National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 151-153
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. मनोजकुमारस्वाइँ**
सहायकाध्यापकश्रेणी,धर्मशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. मनोजकुमारस्वाइँ**
सहायकाध्यापकश्रेणी,धर्मशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# मनुस्मृतिदृष्ट्या आध्यात्मचेतनाविचारे अन्तरात्मन आह्वानम्

**डॉ. मनोजकुमारस्वाइँ**

**सारः -** संस्कारेऽस्मिन् मानवानां हितं धर्म इति शास्त्रवचनानुसारेण धर्मः जनानां हितमाचरतीति द्रढीयान् विश्वासः विद्यते। धर्मप्रधानेऽस्मिन् भारतवर्षे मनुष्यः सुखलाभाय सर्वथा यत्नशीलो भवति। परन्तु स्व स्वचिन्तानुसारेण सुखं सर्वथा सर्वदैव न प्राप्यते । मनुष्यः संसारेऽस्मिन् यत् सुखं दुःखं च अनुभवति तत् कर्मानुसारमिति। अतैव पुण्येन कर्मणा पुण्यं पापेन कर्मणा पापं भवति इति शास्त्रे विहितमस्ति। पुण्यपापविवेचनाय आध्यात्मज्ञानमावश्यकम् । उपनिषदो यद्यपि अध्यात्मविद्यायाः स्तुतिः श्रुयते । तथापि वेदानुमापके धर्मशास्त्रेऽध्यात्मविद्या चर्चिता विद्यते । यस्य प्रमाणं मनुस्मृतौ[1] प्राप्यते। यथा

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।**

श्लोकेऽस्मिन् यद्यपि आत्मशब्दो मनसोऽर्थे व्यवहृतः भाष्यकारेण कुल्लुकेन तथापि तस्यैवात्मनो महत्त्वं मनुना[2] प्रत्यपादि –

**आपदर्थं धनं रक्षेददारान्रक्षेद्धनैरपि।**
**आत्मानं सततं रक्षेद्दारैरपि धनैरपि।।**

अत्रात्मानं सर्वदा दारधनपरित्यागेनापि रक्षेत् । सर्वत एवात्मानं गोपयेत् इति शास्त्रीयमरणव्यतिरेकेण आत्मरक्षा कार्येत्युपदेशः प्रदत्तः। पुनश्च सर्वभूतेषु स्थावरजङ्गमात्मकेषुवहमेवात्मरूपेणापि सर्वाणि भूतानि परमात्मसिद्धानि मय्येव परमात्मनि आसत इति सामान्येन जानन्नात्मयाजी ब्रह्म तस्य भावः स्वाराज्यं ब्रह्मत्वं लभते। यथोक्तम्[3]–

**सर्वभूतेषु चात्मनं सर्वभूतानि चात्मनि।**
**समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।**

अत्र स्त्रीसुरक्षाविषये उक्तं यथा – आप्तैराज्ञाकारिभिः पुरुषैरपि गृहेऽवरुद्धाः भवन्ति, याः दुःशीलतया नात्मानं रक्षन्ति । यास्तु धर्मज्ञतया आत्मानमात्मना रक्षन्ति ता एव सुरक्षिता भवन्ति ।

**अरक्षिता गृहे रुद्धाः पुरुषैरात्मकारिभिः।**
**आत्मानमात्मनायास्तु रक्षेयुस्ताः सुरक्षिताः।।**[4]

अध्यात्मरतिः सर्वदा ब्रह्मध्यानपरः स्वस्तिकादियोगासननिष्ठः, निरपेक्षः, निरामिषः (आमषं विषयास्तदाभिलाषरहितः) आत्मनो देहेनैव सहायेन मोक्षसुखार्थी इह संसारे विचरेत्। क्रियारम्भविषयेऽपि उक्तम् –

**आत्मार्थं च क्रियारम्भो निन्दितान्नदनं तथा ।**[5]

इन्द्राद्याः सर्वदेवताः परमात्मैव सर्वात्मत्वात्परमात्मनः। सर्वं गजदात्मयेवातिष्ठति। परमात्मैवेषां क्षेत्रज्ञादीनां कर्मसंबन्धं जनयति। तथा च श्रुतिः एष ह्येव साधु कर्म कारयति यमर्ध्वं निमीषति । एष ह्येवासाधु कर्म कारयति यमधो निनीषति । यथोक्तम्[6] –

**आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम् ।**
**आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम् ।।**

मानवः सदैव सद्भावमसद्भावं च जानन् आत्मन्युपस्थितं ब्रह्मस्वुरुपं स्वाक्षात्कुर्यात्। यस्मात्सर्वमात्मत्वेन पश्यन् रागद्वेषा-भावादधर्म मनः न कुर्यात् । एतस्य सुष्पष्टाथमुक्तं -

**सर्वमात्मनि संपश्येत्सञ्चासद्य समाहितः।**
**सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः।।**[7]

अतः शुभाशुभकर्मप्रतिष्ठा आत्मैवात्मनः शरणं, तस्मादेव स्वमात्मानं नराणां मध्यमादुत्तमं साक्षिणं मृषांभिधाने नावज्ञासी ।

**भूमिका -** सद्भावात् असद्भावं प्रति अग्रसरति शिशुः यदा जन्म लभते तदा कश्चन देव अवतरित इति मन्यते। कारणं तस्मिन् लेशोऽपि कलुषो न तिष्ठति, वरं दिव्यतया देदिप्यते मुखमण्डलम् । यदा वयः वर्धते तदा भिन्नपारिपार्श्विकपरिस्थित्या परिवेष्टन्या च विकारयुक्तं भवति तस्य मनोमस्तिष्कश्च। फलतः दिव्यभावनायाः स्थाने शनैः शनैः प्रविशति आधिपत्यञ्च विस्तारयति दैत्यभावना दैत्यभावनेयं क्रमश आधिपत्य-विस्तारपूर्वकं मानवं विपथगामिनं करोति। अस्मिन् समये अस्माक-मन्तरात्मा अस्माकं दिग्दर्शिका।

शिशुः यदा जन्म लभते तदा कश्चन देव अवतरित इति मन्यते। कारणं तस्मिन् लोशोऽपि कलुषो न तिष्ठति, वरं दिव्यतया देदिप्यते मुखमण्डलम्। यदा वयः वर्धते तदा भिन्न-पारिपार्श्विकपरिस्थित्या परिवेष्टन्या च विकारयुक्तं भवति तस्य मनोमस्तिकश्च। फलतः दिव्यभावनायाः स्थाने शनैः शनैः प्रविशति आधिपत्यञ्च विस्तारयति दैत्यभावना। दैत्यभावनेयं क्रमश आधिपत्यविस्तारपूर्वकं मानवं विपथगामिनं करोति। अस्मिन् समये अस्माकमन्तरात्मा अस्मान् समुचितमार्गं प्रदर्शयति, अन्तस्स्थेयं चेतना अस्माकं दिग्दर्शिका। अन्तश्चेतनायाः सतर्कवाणीं श्रुत्वा तदनुसारं यः कर्म करोति सः वास्तविकतया मानवः कथ्यते। अन्तरात्मनम् आवेदनं असकृत् विस्मृत्य अमानवीयकर्मकर्ता, मानवो न भवति किन्तु असुरलुत्यः कथ्यते। कारणं दानवत्वं तस्मिनाधिपत्यं विस्तारयति। पुनरिमे समाजाय नैकासां विपदां कारणभूताः, गोविन्दसाहुरिव। केवलं गोविन्दसाहुः मानवरुपिदानवो नास्ति । एतेषां प्रत्यक्षेण परोक्षेण वा सहायका अपि समपर्य्याः, अस्माकं शास्त्रं कथयति ये भ्रष्टाचारं केनापि प्रकारेण सहायतां कुर्वन्ति, ते समापराधे दोषिणः सन्तः स्वोपार्जितपापात् नर्कगामिनो प्रज्वाल्य विनाशयति, तथैव समाजस्य सुन्दरमुखमण्डलं कदाकारं करोति गोविन्दरिवामानवः। फलतः अमितदुःखैः वेदनाभिश्च पीडितो भवति समाजः। आत्मवाधकत्वात् कठोरसत्यमत्रोपस्थापितम्।

अन्तरात्मनम् आह्वानं शृण्वतः चेतनाशीलमनुश्यान् एतद् भृशं व्यथते। ते अन्यायमधर्ममनाचारञ्चासहन्तो विरोधाचरणं कुर्वन्ति। अन्यायाधर्मयोः सपक्षे कदापि नैव तिष्ठति । अन्तरात्मा तान् ताडयति, यथा आव्राहांलिंकनक्षेत्रे जातम् । एकदा आमेरिकाया कश्चन धनिकः लिङ्कनमहोदयेन मिलित्वा तं व्यवहाराय प्रवर्त्तितवान्। प्रचुरधनस्य लालसामपि प्रदर्शितः। धैर्येण सर्वं शृत्वा लिकनमहोदय कथिवान् वाक्किलत्वेनाहं मम वृत्तिगतसमयं विक्रीणीयां परन्तु नैतिकतां न त्यजेयं विवेकञ्चापि न विक्रीणीयाम्। अनेन मम मन्तरात्मा धिक्कारपूर्वकं वदिष्यति – लिकन् त्वं मिथ्यावादी त्वं प्रवञ्चकः। अन्तरात्मानः वाणीं विस्मृत्य आत्मानं प्रति स्वयं प्रवञ्चनां न कुर्याम्। अनेनहं न जीवेयम्। कारणं प्रतिमहूर्त्तं ममान्तरात्मा इत्थं मम दंशनं करिष्यति । आत्मदर्शनं कथं सम्भवपरम् इति यिज्ञासायं मनुस्मृतौ प्रतिपाद्यते यत् मनुस्मृतिः धर्मशास्त्रस्य प्रमुखः ग्रन्थः। अस्मिन् ग्रन्थे प्रत्यक्षतया “आध्यात्मा चेतना” इति पदं न दृश्यते, किन्तु तस्य तत्त्वस्वरूपं धर्म, आत्मविद्या, इन्द्रियनिग्रहः, तपः, त्रिविधगतिः, सत्यं, शौचम्, मोक्षमार्गश्च इत्यादि-विषयैः विस्तरेण विवक्षितम् अस्ति।

**कुञ्चिकाशब्दाः–** सारः, भूमिका, आत्मनः प्रधानत्वम्, धर्मस्य आत्म-रक्षणस्वभावः. मनोनिग्रहे आत्मरक्षणस्वभावः, सत्यस्य ब्रह्मत्वम्, मनुना वर्णिताः चत्वारपुरुषार्थाः, निष्कर्षः।

**1. आत्मनः प्रधानत्वम् -** मनुः आत्मा पुरुषस्य परं नायकं मानयति “आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथाऽऽत्मनः।[8]” पुरुषस्य कर्म, धर्म, पापपुण्यफलानां च साक्षिरूपे आत्मा परामर्श्यते । एतेन बोध्यते यत् आध्यात्मचेतना आत्मदर्शने उपतिष्ठति ।

**2. धर्मस्य आत्मरक्षणस्वभावः -**

मनुः धर्मं चेतनस्य रक्षाकरणरूपेण द्योतयति “धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।[9]” — मनुः ८।१५ धर्मपरित्यागः आत्महानेः प्रमुकं कारणं भवति, धर्मपालनं तु आत्मरक्षणम्। धर्मपालनं नाम चेतनायाः शुद्धिकारणम् ।

**3. मनोनिग्रहे आध्यात्मिकचेतनायाः महत्त्वम् -**

मनुस्मृतौ दम, शम, इन्द्रियनिग्रह इत्येतानि आध्यात्मचेतनायाः मूलभूततत्त्वानि निर्दिष्टानि “दमः शमो दया सत्यं शुचिर्दानं क्षमा धृतिः।” एते गुणा आत्मचेतनां प्रबोधयन्ति । मनोनिग्रहेन एव चेतना सूक्ष्मा, विशुद्धा च भवति ।

**4. सत्यस्य ब्रह्मत्वम् –** चेतनायाः परं स्वरूपं मनुः सत्यं परमं ब्रह्म समाख्याति “सत्यं हि परमं ब्रह्म धर्मस्य परमं पदम्।” (अर्थपरिकल्पितम्) सत्यनिष्ठः पुरुषः आत्मचेतनां निर्मलीकरोति। सत्यं चेतनायाः प्रकाशस्तम्भरूपम्। सत्यं पारवारस्य नौरिव स्वर्गस्य सोपानं वर्तते[10] तपः, मौनम्, शौचं च चेतनापवित्रीकरणोपायाः भवन्ति। मनुस्मृतौ तपः आध्यात्ममार्गस्य च प्रमुखं साधनम् इति प्रतिपादितम् अस्ति। “तपसा शुध्यति आत्मा। तपसा किल्बिषं हन्ति।[11] तपः, मौनं, शुचिता, स्वाध्यायश्चैतेषां माध्यमेन अन्तःकरणशुद्धिः भवति, यतः आध्यात्मचेतना जागरूकतां प्राप्नोति ।

5. **मनुना वर्णिताः चत्वारपुरुषार्थाः -**

धर्मः, अर्थः, कामः, मोक्ष एतेषु धर्मपालनं मनुश्यस्य परमं कर्त्तव्य-मिति।धर्मानुमोदितकर्माचरणेन मोक्षसाधनं भवेदिति, अतः मनुस्मृतौ आत्मज्ञानम्, वैराग्यम्, शमदमादिसाधनानि, सत्यनिष्ठा, मनोनिग्रह आध्यात्मचेतनायाः पराकाष्ठा इत्यादिनि निर्देसितानि।

**निष्कर्षः -**

मनुमतानुसारम् आध्यात्मचेतना न खलु केवलं दार्शनिकदृष्ट्या ज्ञेयम्, किन्तु धर्मपालनेन, इन्द्रियनिग्रहेन, सत्यनिष्ठाया, तपसा, वैराग्येण, शौचाचारेण च इत्येषां माध्यमेन आत्मदर्शनस्य सम्भव-परमिति। येन आत्मदर्शनेन अन्तरात्मन आह्वानं शुत्वा सुन्दरसावलीलसमाजगठने यत्नवन्तो भवेम ।

अन्तोतगत्वा एतत् वक्तुं शक्यते यत् मनुस्मृतौ नैतिकाचारदानादिषु शुद्धता एव आध्यात्मचेतनायाः आध्यात्ममार्गस्य च मुख्यकारणम् इति।

**सहायकग्रन्थसूची –**

मनुस्मृतिः– मनुः, (कुल्लुकभट्टप्रणीत मन्वर्थमुक्तावली टीकासहित) चौखम्भा संस्कृत भवन, वारणसी, 221001, 2015

**सन्दर्भ:**

[1] मनु.स्मृ.-2/6

[2] मनु.स्मृ.-7/213

[3] मनु.स्मृ.-12/91

[4] नु.स्मृ.- 9/12

[5] मनु.स्मृ.-11-64

[6] मनु.स्मृ.-11/119

[7] मनु.स्मृ.-12/118

[8] मनु.स्मृ.-8/84

[9] मनु.स्मृ.-8/15

[10] मनु.स्मृ.-8/82, प्रक्षिप्तश्लोकः -8

[11] तपो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते।। मनु.स्मृ.-12/104